## ३८. यदि ज्वरः तर्हि गुलिके

यथा-तथा, यदि-तर्हि

अखिलः - राजेशः किमर्थम् अद्य कार्यालयं नागतवान् ?

माधुरी - अद्य प्रातः आरभ्य तस्य महान् ज्वरः अस्ति भोः । अतः सः शयनं कृतवान् ?।

अखिलः - किं सः निद्रां कृतवान् ? तस्मै भवती औषधं दत्तवती खलु ?

माधुरी - इदानीं सः औषधं पीत्वा निद्रां कृतवान् । यदा षट्वादनं भवति तदा पुनः औषधं दास्यामि ।

अखिलः - यदा उत्तिष्ठति तदा 'अहम् आगतवान् ' इति वदतु ।

माधुरी - उपविशतु । काफी ददामि । श्वः यदि ज्वरः न्यूनः भविष्यति तर्हि सः कार्यालयम् आगमिष्यति ।

अखिलः - मास्तु यदि विश्रान्तिः आवश्यकी तर्हि स्वीकरोतु । अहं कार्यालये वदामि ।

माधुरी - यदा ज्वरः भवति, तदा किमपि सः न स्वीकरोति । अतः निःशक्तिः भवति ।

अखिलः - अहम् आगच्छामि । तं सूचयतु ।

राजेशः - माधुरि ! इदानीं ज्वरः अधिकः अस्ति इति चिन्तयामि, पश्यतु । वैद्यः किम् उक्तवान् ?

माधुरी - यदि ज्वरः अधिकः अस्ति तर्हि गुलिके ददातु इति उक्तवान् । भवान् शयनं करोतु अहं जलम् आनयामि।